INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN : 2277-7881
VOLUME 1, ISSUE 2, JUNE 2012

# संस्कृतवाङ्मये बुद्धिः तत्स्वरूपञ्च

**Dr. P. Swapna Haindavee,** M.A., Ph.D.,

Principal (FAC),

M.R.Govt. Sanskrit College, Vizianagaram

**उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।**

**वर्षं तद् भारतं नाम भारती यत्र सन्ततिः ।।**

उत्तरस्यां दिशि हिमालयादारभ्य दक्षिणे कन्याकुमारीपर्यन्तं भारतवर्षस्य विस्तारः भवति । अत्र निवासमानः जनाः भारतीयाः इति कथ्यन्ते । अत्र सर्वे भाषानुसारं, वस्त्रपरिधानस्याधारेण, भोजनस्याधारेण च देशस्य विभिन्नप्रान्तेषु निवसन्ति । प्रान्तः भिन्नः भवतु नाम एकः अपरस्य विपत्काले संकटकाले वा परस्परं सहाय्यं कर्तुम् अग्रे आगच्छन्ति । भारतवर्षं यदा पराधीनम् आसीत् तदानीं सर्वे मिलित्वा एकत्रसम्भूय स्वातन्त्र्यम् आनीतवन्तः इति एतद् एकमुदाहरणम् ।

भारतवर्षे निवसन्तः जनाः प्राचीनकाले विद्यार्जनार्थं गुरुगृहं गच्छन्तः आसन् । प्राचीनकाले गुरुगृहे प्राचीनपद्धत्या मौखिकाभ्यासेन शिक्षाप्रदानं प्रचाल्यमानमासीत् । प्राचीनपद्धत्या अध्ययनेन छात्राणां बुद्धिः व्यक्तित्वविकासः मन्दगत्या भवति एव । प्राचीनकाले शिक्षा गुरुकेन्द्रितशिक्षा आसीत् परन्तु इदानीं शिक्षा छात्रकेन्द्रिता वर्तते । अध्यापकानां मूललक्ष्यमासीत् अन्तर्निहितशक्तीनां बहिः आनयनम् एवञ्च छात्राणाम् व्यक्तित्वनिर्माणं करणीयमिति । इदानीं बालाः शिक्षाग्रहणार्थं विद्यालयं प्रति गच्छन्ति एव । अधुना विभिन्नानाम् आधुनिकयन्त्राणां, तन्त्राणां, प्रणालीनाम्, उपकरणानाञ्च सहायेन पाठ्यविषयं छात्रान् बोधयन्ति । एतेषां सहायेन पाठनेन छात्राणां विषयस्य अधिगमः शीघ्रं भवति। अध्यापकाः आधुनिकयन्त्राणां सहायेन एकस्यां कक्षायां बहुन् अध्यापयितुं शक्नुवन्ति । छात्राः विषयान् अवगच्छन्ति न वा मूल्याङ्कनस्याधारेण वा बुद्धिलब्धेः आधारेण ज्ञातुं शक्यते ।

**बुद्धेः परिचयः-**

बुद्धिः मनुष्यस्य जन्मजातक्षमता। बुद्धिः प्रत्यक्षरूपेण द्रष्टुं न शक्यते। आचरणमाध्यमेन ज्ञातुं शक्यते। बुद्धिः इति एकः एतादृशः शब्दः अस्ति यस्य उपयोगं वयं स्मरणं, शिक्षणं, तार्किकचिन्तनं, विषयावगमनम्, व्यवहारः इत्यादिषु व्यवहारं कुर्मः। मनोविज्ञानशास्त्रानुसारेण बुद्धिः वंशानुक्रमानुसारं निर्धारिता भवति परन्तु वंशानुक्रमः केवलं बुद्धिं न निर्धारयति। मनोवैज्ञानिकेषु बुद्धिशब्दस्य प्रयोगः सामान्यार्थात् विशेषऽर्थे भवति।

बुद्धिः शास्त्रेषु त्रिधा विभज्यते सात्त्विकी, राजसी, तामसी चेति। आदिशङ्कराचार्यपादास्तु ज्ञानं बुद्धिवृत्तिः इति अमन्यत। शास्त्रेषु बुद्धिः विवेकरूपेण उपवर्णिता वर्तते। आधुनिकयुगे बुद्धिः ज्ञानरूपेति मन्यते। उदाहरणरूपेण वदामश्चेत् बालकः स्वकीयं पाठ्यविषयं शीघ्रमवगच्छति चेत् सः बुद्धिमान् इति उच्यते तथैव कश्चन छात्रः प्रश्नस्य श्रीघ्रम् उत्तरं समाधानं वा ददाति सः मेधावी बालकः इत्युच्यते।

**संस्कृतवाङ्मये बुद्धेः स्वरूपम्**

भारतीयाः महर्षयः बहून् शास्त्रग्रन्थान् संस्कृते प्रणीतवन्तः। तेषु ग्रन्थेषु शास्त्रेषु च बुद्धेः विमर्शं असकृत् कृतवन्तः। कवयश्च समाजस्य तथा परिवारस्य विकासाय मानवस्य जागरणाय प्रचेष्टां कृतवन्तः। अधुना संस्कृतवाङ्मये उपनिबद्धानि बुद्धिविषयकतत्त्वानि उपस्थाप्यन्ते -

आचार्यविष्णुशर्मा पञ्चतन्त्रग्रन्थे बुद्धिविषये न्यगदत् यत् -

**वरं बुद्धिर्न सा विद्या विद्यया बुद्धिरुत्तमा।**
**बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः॥ (अपेक्षितकारकम् ३६)**

न हि विद्यार्जनमात्रं बुद्धिप्रकर्षः अतः अनुभवप्राप्तविषयाणां संव्यूहानां सङ्घटनम् अवश्यमेव करणीयम् अन्यथा अधीतशास्त्राः सन्तोऽपि बुद्धिहीनाः जनाः सिंहकारकाः इव विनश्यति।

श्रीमद्भगवद्गीतायां व्यासमहर्षिः वदति जडविषयात् इन्द्रियगणः श्रेष्ठः इति। इन्द्रियाणां मध्ये मनः श्रेष्ठम् इति तस्मादपेक्षया निश्चयात्मिका वृत्तिरूपा बुद्धिः श्रेष्ठा इत्युक्तम्। पुनः न्यवदत् यः बुद्धेरपेक्षया श्रेष्ठः सः भवति जीवात्मा इति।

**इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते।**

**एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम्॥ (गीता 3.40)**

**इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।**

**मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥ (गीता 3.42)**

**एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना।**

**जहि शत्रुं महाबाहो कामरूपं दूरासदम्॥ (गीता 3.43)**

हे अर्जुन ! निश्चयात्मकबुद्धिशक्तेः प्रभावेण मनशक्तिं निश्चलां कृत्वा कामरूपदुर्जयशत्रूनपि संहरतु।

**कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।**

**योगिनः कर्मः कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये॥ (गीता 5.11)**

योगिपुरुषः सर्वदा शरीर-मनो-बुद्धि-इन्द्रियाणाञ्च सहायेन आसक्तवस्तूनां त्यागं कृत्वा आत्मशुद्ध्यर्थं, चित्तशुद्ध्यर्थञ्च कार्यं कुर्वन्ति।

**तेषां सतत-युक्तानां भजतां प्रीति-पूर्वकम्।**

**ददामि बुद्धि-योगं तं येन मामुपायन्ति ते॥ (गीता 10.10)**

अस्मिन् श्लोके श्रीकृष्णेन शिष्याणां वैशिष्ट्यं कथं भवेत् कस्य कृते आशीर्वादस्वरूपेण बुद्धियोगः दातव्यः इत्यस्मिन् विषये उक्तम्।

महाभारते बादरायणेन अन्नादेव रक्तं वीर्यञ्च भवति। अन्ने जीवः प्रतिष्ठितः अन्नेन इन्द्रियाणां बुद्धेश्च पोषणं भवति इति बुद्धिपोषणं भवतीति उक्तं यथा

**अन्नाद्रक्तं च शुक्लञ्च अन्ने जीवः प्रतिष्ठितः ।**

**इन्द्रियाणि च बुद्धिश्च पुष्णन्त्यन्नेन नित्यशः ।। (महा.भा.आश्व.१०१)**

श्रीमद्भगवद्गीतायां व्यासदेवः वदति कथं स्मृतेः विभ्रमकारणात् बुद्धिशक्तेः विनाशः भवति। तस्य निवारणार्थम् उपायाः अपि वदति। यदि मनुष्यः क्रोधान्वितः भवति चेत् तस्य मोहगुणः उत्पन्नः भवति, पुन वदन्ति मनुष्यस्य अन्ते मोहः इति भावनाजागरणं भवति चेत् तस्य स्मृतेः विभ्रमः भवति । स्मृतेः विभ्रमस्य कारणेन तस्य बुद्धेः नाशः भवति। परं मनुष्यस्य यदि बुद्धेः नाशः भवति चेत् तस्य जीवनस्य हानिः भवति इति।

**क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः।**

**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।। (गीता 2.63)**

मनुना मनुस्मृतिग्रन्थे उक्तमस्ति येषां शरीरे बुद्धिक्षमता विद्यते ते एव श्रेष्ठप्राणिनः इति उच्यन्ते । मनुष्यस्य शरीरे बुद्धिक्षमता इत्यस्मात् कारणात् मनुष्यः श्रेष्ठः इति परिगण्यते।

**भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः ।**

**बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ।। (मनुस्मृतिः 1.96)**

नारायणपण्डितेन विरचिते हितोप्रदेशग्रन्थे उक्तमस्ति बुद्धिक्षमता यस्य पार्श्वे भवति सः बलशाली इति उच्यते।

**बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम्।**

**पश्य सिंहो मदोन्मत्तः शशकेन निपातितः ॥ (हितोपदेशः)**

महर्षि चाणक्येन चाणक्यनीतौ उक्तमस्ति श्वः किम् भवति कोऽपि न जानति । एतदर्थं श्वः यद् कार्यं तद् यदि अद्य कृत्वा स्थापयति सः बुद्धिमान् इति वक्तुं शक्यते । द्वितीयश्लोके उक्तं यः देशेषु न परिभ्रमति एवञ्च यः पण्डितानां सेवां न करोति तस्य बुद्धिविकासो नैव भवति इति।

**न हि कश्चित् विजानाति किं कस्य श्वो भविष्यति।**

**अतः श्वः करणीयानि कुर्यादद्यैव बुद्धिमान्॥**

**यो न सञ्चरते देशान् यो न सेवते पण्डितान्।**

**तस्य सङ्कुचिता बुद्धिर्घुतबिन्दुरिवाम्भसि॥**

महर्षिवाल्मीकिना रामायणे वर्णितमस्ति यत् रामस्य कृतीः, बुद्धिक्षमतां, दूर्लभगुणान् च दृष्ट्वा उक्तं यत् एते गुणाः विशेषाः एते न कुत्रापि प्राप्यन्ते।

**बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः।**

**मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तश्श्रूयतान्नरः॥1.1.7॥**

**उपसंहारः**

भारतीयाः महर्षयः विभिन्नपण्डिताः कवयः विभिन्नशास्त्रेषु ग्रन्थेषु च बुद्धिक्षमता कारणेनैव मानवः श्रेष्ठः इति प्रोक्तवन्तः। अध्ययनेन छात्राणां बुद्धिविकासः भवति इति मतम् उपस्थापितम्। बुद्धिविकासेन कथं छात्राणां व्यक्तित्वविकासोऽपि भवतीत्युक्तम्। व्यक्तीनां बुद्धिविकासार्थं किं किं करणीयं इति सुष्ठु प्रतिपादितम्। महापुरुषाणां दर्शनेन तैः सह कार्यकरणेन तेषां व्यक्तित्वं दृष्ट्वा कथं स्वस्य व्यक्तित्वं निर्मातव्यम् इत्यादयोः विषयाः निरूपिताः सन्ति।

**उपयुक्तग्रन्थसूची (Bibliography)**

1. श्रीमद्भगवद्गीता गीताप्रेस, गोरखपुर।
2. हितोपदेशः, संस्कृतभाषाप्रचारसमिति, हैदराबाद।
3. श्रीमद्रामायणम्, चोखम्बाप्रकाशनम्, वारणासि।
4. गीताप्रवेशः, द्वितायभागः - प्रथमखण्डः, संस्कृतभारती, बेङ्गलूरु।
5. गीताप्रवेशः, द्वितायभागः - द्वितीयखण्डः, संस्कृतभारती, बेङ्गलूरु।